International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 01-02
© 2019 IJSR
www.anantaajournal.com
Received: 01-05-2019
Accepted: 03-06-2019

**डा० प्रिति पारेष्वरि महान्ति**
आसिस्टेन्ट प्रोफेसर
(धर्मशास्त्रविभागः) राजकीय संस्कृत महाविद्यालय, भागलपुरम् बिहार, भारत

**Correspondence**
**डा० प्रिति पारेष्वरि महान्ति**
आसिस्टेन्ट प्रोफेसर
(धर्मशास्त्रविभागः) राजकीय संस्कृत महाविद्यालय, भागलपुरम् बिहार, भारत

# धर्मशास्त्रे गृह्यसूत्रस्य प्रयोजनीयता

**डा० प्रिति पारेष्वरि महान्ति**

**प्रस्तावना**

पत्न्या सह अग्नौ क्रियमाणं कर्मैव गृह्यकर्मेति पूर्वं प्रतिपादितम्। तेषां कर्मणां विधानं यस्मिन् सूत्रग्रन्थे समुपलभ्यते तदेव गृह्यसूत्रमितिकथ्यते। तस्य प्रयोजनीताविषये सम्प्रति विचारः क्रियते। ऋग्यजुः सामाथर्वभेदेन वेदश्चतुर्विध इति सर्वैः स्वीक्रियते। यद्यपि त्रयीति प्रसिद्ध्या त्रयाणामेव वेदानां प्राशास्त्यं लोके दृश्यते तथापि वेदाश्चत्वार एव इत्यत्र निर्विवादम्। यतो हि भगवता कृष्णद्वैपायनेन शिष्याणां ग्रहणसौकर्याय वेद ऋग्यजुःसामाथर्वभेदेन चतुर्द्धा विभज्य यथाक्रमं पैल–वैशम्पायन–जैमिनि–सुमन्तुभ्यः प्रदत्तः। कालक्रमेण ते चत्वारोऽपि वेदाः शिष्योपशिष्यगृहीताः बहुशाखात्वमापन्नाः। प्रसङ्गेऽस्मिन् व्याकरणमहाभाष्ये भगवता पतञ्जलिना पस्पशाह्निके प्रतिपादितं यत्–

एकशतमध्वर्युशाखाः सहस्त्रवर्त्मा सामवेदः।
एकविंशतिधा बाह्वृच्यम् नवधा आथर्वणो वेदः।। इति।।

तत्र यजुर्वेदोऽपि पुनः शुक्लकृष्णभेदेन द्विविधः। श्रूयते पुराकाले गुरुणा वैशम्पायनेन केनापि कारणवशात् क्रोधान्वितो भूत्वा 'मदधीतं परित्यज' इति शिष्य याज्ञवल्क्यं प्रति आदेशो दत्तः। तेन याज्ञवल्क्यस्तत्क्षणात् पठितस्य वान्तं चकार। तदानीं तस्यैव गुरोः वैशम्पायनस्यान्यैः शिष्यैः तित्तिरिपक्षिरूपेण तं वान्तमास्वादितम्। तस्माद् याज्ञवल्क्यवान्तत्वेन ग्लानिमापन्नानि तानि कृष्णयजुर्वेद इति संज्ञामावहन्ति। तित्तिरिभिः गृहीतत्वेन तानि तैत्तिरीय इति संज्ञान्तरमप्यलभन्त। तद्ग्रहीतारश्च शाखाप्रवर्त्तका गुरोर्व्रताचरणेन चरकाः चरकाध्वर्यवाश्चेति ख्यातिमापन्नाः। तदनन्तरं याज्ञवल्क्यः महता तपसा मध्याह्नसमये भवन्तमादित्यमाराध्य तस्मादजातयामानि यजूंष्याजहार। तानि च यजूंषि स्वच्छानीति कृत्वा शुक्लयजुर्वेद इति नाम्ना प्रसिद्धान्यभूवन्। वाजिरूपधरेण सूर्येण प्रदत्त इति हेतोः वाजसनेयसंज्ञामपि लेभे।[1] वायुपुराणानुसारेण वाजिरूपिणा याज्ञवल्क्येन वेदो लब्ध इति हेतोः तदध्येतारः वाजिन इति कथ्यन्ते। तद्यथा –

अश्वरूपाय मार्त्तण्डो याज्ञवल्क्याय धीमते।
यजूंष्यजातयामानि ब्राह्मणा येन केन च।
अश्वरूपाय दत्तानि ततस्ते वाजिनोऽभवन्।। इति।।

यजुर्वेदस्य एकशतशाखासु शुक्लयजुर्वेदस्य पञ्चदशशाखाः कृष्णयजुर्वेदस्य च षडशीतिशाखाः इति प्रसिद्धिरस्ति। प्रसङ्गेऽस्मिन्[2] वायुपुराणे प्रतिपादितं यत्–

वैशम्पायनगोत्रोऽसौयजुर्वेदं व्यकल्पयत्।
षडशीतिस्तु तेनोक्ताः संहिता यजुषा शुभाः।। इति।।

पुनश्च प्रसङ्गेऽस्मिन्[3] ब्रह्माण्डपुराणेऽपि प्रतिपादितं यत्–

वैशम्पायनगोत्रोऽसौयजुर्वेदं व्यकल्पयत्।
षडशीतिस्तु तेनोक्ताः संहिता यजुषा शुभाः।। इति।।
तथा–षडशीतिस्तथा शिष्याः संहितानां विकल्पकाः।
सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्त्तिताः।। इति।।

पुनश्च शुक्लयजुर्वेदस्य पञ्चदशशाखा[4] विष्णुपुराणेऽप्युक्ता। यथोक्तं तत्र–

शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्।
काण्वाद्यास्तु महाभागा याज्ञवल्क्याः प्रकीर्त्तिताः।। इति।।

पुनश्च[5] वायुपुराणे प्रतिपादितं यत्–इत्येते वाजिनः प्रोक्ता दश पञ्च च सस्मृताः।। इति।

एतेन शुक्लकृष्णयोराहत्य एकाधिकशतं 101 अध्वर्युशाखा भवन्ति। इयञ्च संख्या पतञ्जलिना परिकीर्त्तिता, वायुपुराणेऽपि दृढीकृता। यथोक्तं तत्र–[6] शतमेकाधिकं कृत्स्नं यजुषां वै विकल्पकाः।इति।परन्तु [7]कूर्मपुराणमते यजुर्वेदस्य शतं शाखा सन्ति। तद्यथा–

एकविंशतिभेदेनऋग्वेदं कृतवान् पुरा।
शाखानान्तु शतेनैव यजुर्वेदमथाऽकरोत्।।इति।।

[8]शौनकीयचरणव्यूहे तु साकल्येन यजुर्वेदस्य शाखाः षडशीति 68 रेव दर्शिताः। तद्यथा–यजुर्वेदस्य षडशीतिभेदा भवन्तीति। [9]देवीपुराणेऽपि तथा प्रतिपादितम्। यथोक्तं तत्र–
संख्या यजुर्वेदस्य श्रूयताम्। षडशीतिविभेदेन मया भिन्नं शिवाज्ञया।। इति।

विष्णुपुराणे तु यजुषां वैशम्पायनप्रवर्त्तिताः सप्तविंशतिः27याज्ञवल्क्यप्रवर्त्तिताः पञ्चदश 15 इति साकल्येन द्विचत्वारिंशत् 42 शाखा भणिताः। यथोक्तं[10] तत्र–

यजुर्वेदतरोः शाखाः सप्तविंशन् महामुनिः।
वैशम्पायननामाऽसौ व्यासशिष्यश्चकार वै।। इति।।

पुनश्च[11]तत्रैव– शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्।इति।
एते सर्वे मतभेदाः शाखानां मुख्यामुख्यभेदापेक्षया उक्ताः इति व्यवस्थापने तेषामविरोधः साधयितुं शक्यत इति। उक्तेषु एकशतशाखासु कासाञ्च नामान्युपलभ्यन्ते। तत्रादौ कृष्णयजुःशाखाःचरणव्यूहे दर्शिताः। तद्यथा– तत्र चरकाणां द्वादश भेदा भवन्ति। 1) चरकाः 2) आह्वरकाः 3) कठाः 4) प्राच्यकठाः 5) कपिष्ठलकठाः 6) चारायणीयाः 7) वारायणीयाः 8) वार्त्तान्तवेयाः 9) श्वेताश्वतराः 10) औपमन्यवः 11) पाताण्डनीयाः 12) मैत्रायणीयाश्चेति।
मैत्रायणीया अपि षड्विधा भवन्ति। 1) मानवाः 2) वाराहाः 3) दुन्दुमाः 4) छागलेयाः 5) हारिद्रवेयाः 6) श्यामायनीयाश्चेति।
तैत्तिरीयकाः द्विविधा भवन्ति। 1) औखेयाः 2) खाण्डिकेयाश्चेति। खण्डिकेया अपि पञ्चविधाः। 1) कालेता 2) शाठ्यायनी 3)हैरण्यकेशी 4) भारद्वाजी 5) आपस्तम्बी चेति।
एवं प्रकारेण शुल्कयजुःशाखा अपि तत्रैवोक्ताः प्राचयोदीच्यनैर्ऋत्वाजसनेया नाम पञ्चदशभेदाः। तद्यथा– 1) जाबालाः 2) बौधायनाः 3) काण्वाः 4) मा ध्यन्दिनेयाः 5) शाफेयाः 6) तापनीयाः 7) कपोलाः 8) पौण्डरवत्साः 9) आवटिकाः 10) परमावटिकाः 11) पाराशराः 12) वैणेयाः 13) वैधेयाः 14) अद्धाः 15) बौधेयाश्चेति।

[12]वायुपुराणे वाजसनेयशाखास्तत्प्रवर्त्तकानाम्ना प्रदर्शिताः। तद्यथा–

याज्ञवल्क्यस्य शिष्यास्ते कण्व–वैधय–शालिनः।
मध्यन्दिनश्च शापेयो विदग्धश्चाप्य उद्दलः।
ताम्रायणश्च तात्सश्च तथा गालव–शैशिरौ।
आटवी च तथा पर्णी वीरणी सपरायणः।
इत्येते वाजिनः प्रोक्ताः दश पञ्च च सस्मृताः।। इति।।

एतावता वाजसनेयशाखायां वायुपुराण–चरणव्यूहयोर्मध्ये महान् भेदः संप्रदृश्यते। एवं प्रकारेण नानावेदानां नानाशाखासम्बन्धिनां वैदिकानां गृहस्थानां कर्मकाण्डविधानार्थं गृह्यसूत्राणां महती प्रयोजनीयता विद्यते। स्वस्वशाखोक्तगृह्यसूत्रानुसारेण यदि कर्मकाण्डविधानां न क्रियेत तर्हि तत् तत् कर्म फलवन्न भवति। अपि च स्वस्वगृह्यसूत्रानुसारेण परम्परया तत्तत् संस्कारादीनामनुष्ठितत्वात् एकशाखीयः जनः शाखान्तरीयगृह्यसूत्रमाधारीकृत्य संस्कारादिकं नानुतिष्ठेत् तथा सति विरोधदर्शनात्। तेन न केवलं परम्पराया रक्षणं क्रियते, अपि तु संस्काराणां यथावदनुष्ठानं भवति। पुनश्च स्थलविशेषे एकया शाखया सह शाखान्तरस्य विरोधदर्शनादपि एकशाखीयः जनः शाखान्तरीयगृह्यसूत्रमाधारीकृत्य संस्कारादिकमनुष्ठातुं नैवेच्छेत्। तावता चात्मीयता वर्द्धते स्वाभिमानश्च सुरक्षितो भवति। भारतवर्षे नानास्थानेषु नानाशाखीया ब्राह्मणा दृश्यन्ते। ते च एकस्थानस्था सन्तोऽपि स्वगृह्योक्तविधिं न परित्यजन्ति। कालक्रमेण बह्वीनां शाखानां लोपेऽपि वंशपरम्परया प्रचलितगृह्यसूत्रमाधारीकृत्य जना संस्कारादिकमनुतिष्ठन्तो दृश्यन्ते। विशेषतः एकस्मिन् यजुवेदे विद्यमानयोः शुक्लकृष्णभेदेन यावत्यः शाखाः सन्ति, तासु च यद् यद् गृह्यसूत्रमनुसृत्य कर्मकाण्डादिकमनुष्ठीयते तत् परम्परया प्रचलति। परवर्त्तिकाले तस्य परिवर्त्तनं न कोऽपि सहते। न ही कश्चन शुक्लयजुवेदी कृष्णयजुर्वेदीयशाखासम्बन्धिगृह्यसूत्रमनुसृत्य कर्मकाण्डविधानं कुर्वाणो दृश्यते, तयोर्मध्ये परस्परं भेदस्वीकारात्। अतः स्वस्वशाखाध्यायिनां कृते स्वस्वगृह्यसूत्राणां कियती प्रयोजनीयता तदनुमातुं शक्यते।

## संदर्भ सूची


1. वा. पु. – 69/21–22
2. वा. पु. – 61/5
3. ब्रह्माण्ड. पु. – अ.35
4. वि. पु. – 3–5–29
5. वा. पु. – 61–26
6. वा. पु. – 61–26
7. कू. पु. – 1–2 अध्याये
8. च. व्यू. – 61–26
9. दे. पु0 – 107 – 18 अध्याये
10. वि. पु. – 3–5–1
11. वि. पु. – 3–5–29
12. वा. पु. – 61/24–26